# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा -शास्त्रीप्रथमवर्षम्** (SEM-1) | **प्रश्नपत्रम् – ६** | **गुणाः - ७०** |
| **विषयः - वास्तुशास्त्रम्** | (C.E.- 1.1.2. Old & New ) | |
| **दिनाङ्कः - २०/१२/२०१८** | *ग्रन्थः वास्तुरत्नावली* | **समयः -२.०० तः ०५.००** |

**प्रथमान्वितिः**

**प्रश्नः १ अधोलिखितेषु कयोश्चिद् द्वयोः सान्वयं व्याख्यां कुरुत ।** **( १० )**

*(१) स्ववर्गं द्विगुणं कृत्वा परवर्गेनि योजयेत।*
*अष्टभिस्तु हरेद् भागं योऽधिकः स ऋणी भवेत्॥*

*(२) ब्राह्मणी सर्वसुखदा क्षत्रिया राज्यदा भवेत्।*
*धनधान्यकरी वैश्या शूद्रा तु निन्दिता बुधैः॥*

*(३) प्रासादे सदनेऽलिन्दे द्वारे कुण्डे विशेषतः।*
*दिङ्मूढे कुलनाशः स्यात्तस्मात्संशोधयेद्दिशः॥*

**प्रश्नः २ अधोलिखितयोः कस्यचिदेकस्योपरि निबंधं लिखत ।** **( १० )**

*(१) दिक्साधनम्।*

*(२) भूमिदोषविचारः।*

**द्वितीयान्वितिः**

**प्रश्नः ३ अधोलिखितेषु कयोश्चिद् द्वयोः सान्वयं व्याख्यां कुरुत ।** **( १० )**

*(१) प्रसादेषु च हर्म्येषु गृहेष्वन्येषु सर्वदा।*
*आग्नेय्यां प्रथमं स्तम्भं स्थापयेत्तद्विधानतः॥*

*(२) षष्टिश्चतुर्भिर्हीना वेश्मानि पञ्च सचिवस्य।*
*स्वाष्टांशयुतं देर्घ्यं तदर्थतो राजमहिषीणाम्॥*

*(३) शुक्लपक्षे भवेत्सौख्यं कृष्णे तस्करतो भयम्।*
*तस्माद्विचार्यकर्तव्यं यदीच्छोच्छ्रियमात्मनः॥*

**प्रश्नः ४ निम्नलिखितयोः कस्यचिदेकस्योपरि निबन्धं निबन्धयत ।** **( १० )**

*(१) द्वारस्थापनविचारः।*

*(२) आयविचारः*

## तृतीयान्विति:

**प्रश्न: ५ अधोलिखितेषु कयोश्चिद् द्वयो: सान्वयं व्याख्यां कुरुत ।** **( १० )**

*(१) विषमाय: शुभायैव समाय: शोकदु:खत: ।*
*वारा: सूर्यारशन्यंशा: सदा वह्निभयप्रदा: ॥*

*(२) दक्षिणपूर्वे कोणे कृत्वा पूजां शिलां न्यसेत्प्रथमम् ।*
*शेषा: प्रदक्षिणैव स्तम्भाश्चैवं समुत्थाप्या: ॥*

*(३) वास्तो: शिरसि पुच्छे च याम्यकृक्षौ च पृष्ठत: ।*
*आयुष्काम: खनेन्नैव कामकुक्षौ खनि: शुभा: ॥*

**प्रश्न: ६ अधोलिखितयो: कश्चिदेकस्योपरि निबन्धं लिखत ।** **( १० )**

*(१) वृषवास्तुचक्रम् ।*

*(२) गृहारम्भे राहुविचार: ।*

## चतुर्थान्विति:

**प्रश्न: ७ अधोलिखितेषु केचन् दशप्रश्नानामुत्तरं लिखत ।** **( १० )**

*(१) ब्राह्मणवर्णाय कस्यां दिशि द्वारं प्रशस्तमस्ति ?*

*(२) 'अ'वर्गस्य स्वामी क: वर्तते ?*

*(३) चत्वार:कोणानां नामानि लिखत ।*

*(४) वटवृक्ष: कस्यां दिशि प्रशस्तमास्ति ?*

*(५) ईशानकोणस्य सम्मुखे क: कोण: भवति ?*

*(६) राज्ञ: प्रथमगृहस्य विस्तार: लिखत ।*

*(७) कस्मिन् कोणे प्रथमस्तम्भं स्थापयेत ।*

*(८) तृणकाष्ठगृहारम्भे कस्य दोषो न विद्यते ।*

*(९) चित्रानक्षत्रे गृहारम्भ: शुभमशुभं वा ?*

*(१०) मन्दवासरे सूतिकागृहनिर्माणं शुभमशुभं वा ?*

*(११) षुष्यनक्षत्रमधोमुखं ऊर्ध्वमुखं वा ?*

*(१२) वास्तुपुरुषस्य कस्यां कुक्षौ खातं खनेत् ।*

*(१३) प्रथमशिलान्यास: कस्मिन् कोणे प्रशस्तमस्ति ।*

*(१४) षष्ठस्थाने यदा सूर्य: स्यात्तदा किं फलं भवति ?*

*(१५) कति आया: सन्ति ?*

--oo--